Book-Post

69

To,

If not delivered please return to :

EDITOR,
THE VEDIC PATH,
P.O. Gurukul Kangri,
(U.P.) 249404.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिं० चं० गूढः सर्वव्यापी सर्वभूतांतरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केव
१२ लो निर्गुणश्चेति एवमेव देवं शास्त्रकृतालनास्तेस्तैः शब्दविशेषैर्बहुधा व्यवहरंति त
था च मंत्रवर्णः सुपर्णं विप्राः कवयो वचोभिरेकं संतं बहुधा कल्पयंतीति तेच श
ब्दविशेषा विस्पष्टमन्यस्मिन्मंत्रे श्रूयते इंद्रं मित्रं वरुणमग्निमाहुरथो दिव्यः सुप
र्णो गरुत्मान् एकं सद्विप्रा बहुधा वदंत्यग्निं यमं मातरिश्वानमाहुरिति नन्वि
द्रमित्रवरुणादयः शब्दा भिन्नदेवतावाचिनो न त्वेकं देवमभिदधति अन्यथा व
रुणयागेऽग्नेर्मंत्रा उपयुज्येत नायं दोषः एकत्वेऽपि देवस्य मूर्तिभेदेन मंत्रव्यवस्थो
पपत्तेः यथा शैवागमेषु शिवस्यैकत्वेऽपि प्रकृतिमाभेदे दक्षिणामूर्तिचिंतामणिमृ गx
त्युंजयादयो मंत्रा मूर्तिविशेषेषु व्यवस्थिताः यथा वा वैष्णवागमेषु गोपालत्रिवि
क्रमनाद्यो मंत्राः तथा देवे पाकि नस्यात् ननु द्रव्यदेवते यागस्य स्वरूपं तद्रूपभेदा
च्च कर्मभेदाः प्रतिपादिताः तत्रैवं प्रसिद्धानये सि वैश्वदेव्यामिक्षा वाजिभ्यो वा दुर्गा
जिनमित्यत्र यथामिक्षावाजिनयोर्द्रव्ययोर्भेदस्तथा वैश्वदेवानां वाजिभ्यो देवेभ्यो १२
भेदोऽभ्युपगंतव्यः इति वा अभ्युपगम्यते चैकस्यैव वास्तवस्य देवस्य कर्मोतष्ठा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समुदायमात्रमिति वैदिकप्रसिद्धिः ततो यावंतो देवा वैश्वदेवस्य निविद्युच्यंते तावंत उपास्या 2
इत्युक्तं भवति तानि च पदानि त्रयस्त्री चेत्यादीनि शतत्रयं सहस्रत्रयं वक्ष्यद्देवविस्तारक
ल्पे च कारणं तत्र तत्र देवतानां संख्याया उपदस्यते य एव देवाः पूर्वं विस्तरतस्त एव संक्षेपे
ण कियंत इति तत्र तत्र प्रश्नार्थः कतीति संख्याप्रश्नः कथमेतदिति स्वरूपविशेष
प्रश्नः तत्र शतानि सहस्रसंख्याकाये देवा उक्तास्ते सर्वे प्रधानभूता न भवंति किंतर्हि प्रा
धान्येन हविर्भजां त्रयस्त्रिंशद्देवानां योगमहिम्ना स्वीकृता रोहितकाविग्रहा एव ततो
नतेषां स्वरूपविशेषः पृथङ्निरूपणीयस्त्रयस्त्रिंशद्देवेषु भूतावस्थापद्यः प्राणप्र
स्त्रक्म्यो वस्वादिभ्यो न्ये तेषु वसुशब्दप्रवृत्तिर्यौगिकी प्राणवाच्येंद्रियाणि आत्मां
तःकरणं इंद्रप्रजापतिशब्दौ ल तु रुण्यास्तनयित्नुयज्ञयोर्वर्तेते अन्नप्राणौ भोज्य गx
भोक्त्रभिमानिनौ अध्यर्धशब्दो वृद्धिसंख्यावाची योयं न तु समष्टिवायुर्वक्ति वायुः
सूत्रात्मा वायुर्वै गौतम सूत्रमिति श्रुतेः अंते प्राणशब्दः परमात्मवाचकः तदेव
स्पष्टयितुं स त्रिवइत्युक्तं सशब्दः परोक्षवाची प्राणशब्दवाच्यः परमात्मा त्रिव
श्वे कोमख्यो देवः तत्स्वरूपं च श्वेताश्वतरा विस्पष्टमामनंति एको देवः सर्वभूते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिं॰चं॰
८

पूर्वकं मंत्रांश्च नेप्रवक्ष्यामि भुक्तिमुक्त्यर्थसिद्धये इत्युपक्रम्य ज्येष्ठसामान्यत्रयेणैव तथा देव
व्रतैरपि ध्येयं तद्देवतागुणसंयमेन पुरुषेणैवेति शिवाभिषेकमंत्रेषु परिगणनाच्च न
न्वस्य वा विनियोगमात्रस्यान्यथासिद्धिस्तथापि पुराणेषु केचित्पंचरात्रसंहिताविशे
षेषु च नारायणेन तत्र सम्पाद्य सहस्रशीर्षेत्यादिविशिष्टं वालणाद्युत्पत्तिस्या
न तत्र दशपदवपुरुषोपदेशो येन सह तस्य तत्र मंत्रार्थकथनमेवैतन्नारायण
परतया विवरणात् तत्रैव तत्र च मभ्युपगंतव्यम् पबृंहणानुरोधित्वाद्वैदिकार्थस्य
व्याख्याया इत्याशंक्य मंत्रविवरणादुपबृंहणानां श्रुतविनियोगांतरानिर्वाहाय
त्वेनान्यथासिद्धिसंभवान्नैतैः श्रुतिस्तत्पदकूलविनियोगमित्तं द्यौर्मूर्धानं विभो
स्तस्य खं नाभिः परमेष्ठिनः सोमसूर्याग्नयो नेत्रा दिशः श्रोत्रं महात्मनः वक्त्राद्वै
ब्राह्मणाः सर्वे बाहू चास्य भगवान्भुजः इन्द्रो विष्णुर्भुजाभ्यां च क्षत्रिया श्च महात्मनः वै
श्या ऊरुप्रदेशात्तु शूद्राः पादान्ति नाकिनः इत्यादिलिंगाद्विषोपबृंहणांतरानु
मोदितं च शिवपरत्वमस्याप्यनुमतं मनस्सावत् अणोराणीयान्सर्वेषाम
णीयांसमणोरपि रुक्माभं स्वप्नधीगम्यं विद्यात्तं पुरुषं परमिति सर्वांतर्यामित्वं

दुर्गा
८

धर्मशास्त्रोपसंहारे २

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

च्छंति ये रुद्रं सर्ववेद्यं मनीषया गृह्णंति क्रियानेरिर संपूर्णमत्तोदकं ऋंतर्नै च्छंति ये रुद्रं म
नीसहितं शिवं पुरीषमेव गृह्णंति क्रियान्तेन संज्ञाय इति श्रुतिरपि अंतरिच्छंति तं
जने रुद्रं परो मनीषया गृभ्णंति जिह्वया रसमिति पुरुषसूक्तमपि शिवपरमेव उ
ताम् तत्व स्येशानइतीशानेपदस्पष्टदृष्ट्या शिवशिवपर्यवसानात् ननु च स्यसामवि
धिब्राह्मणे रोहद्वीदस्पष्टत इत्यादिना वेदस्याः संहितायामुपदेशात् अथर्ववेदे अ
थादानामहाशांतिप्रकरणे तत्र शांतिषु तत्तद्देवत्यमंत्रविनियोगावसरे वेदस्यं
पुरुषसूक्तमिति विधानात् शौनकबौधायनादिस्मृतिषु विष्णुपूजाध्यानहो
मादिषु विनियोगाच्च विष्णुपरत्वमेवतस्य प्रतीयत इति चेन्न बौधायनसूत्रे शिव
संकल्पादिभिः सहश्रीरुद्रांगन्यासमंत्रेषूपदेशात् छंदोगानां केषांचिद्ब्रजस
नेयिनां च महारुद्रजपमध्ये निवेशनान्नमकं चमकं चैव पुरुषसूक्तं च नित्यशः
जपन्नेति महाप्येवं गृह्णंग्रहप्रयाजिर्याद्येति पुराणेष्वपि ब्रह्मवैवर्तस्कन्दशांतिमध्येवाय
व्यकं भेदेवंरुद्रं भुवननायकमित्युपक्रम्य नमकं चमकं चैव पौरुषं सूक्तमेव वचे
त्यादिना जपे विनियोगाच्च लैंगादित्यपुराणेषु सकूर्चे नस्यपुष्पेरारोपयेनमंत्र

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

5

लिं०चं०
८

त्वं परमेष्ठिन: ऋग्वेद: यस्मान्न: स्थानिभूतानि यस्मात्सर्वं प्रवर्त्तते नदाऽरुस्तत्परं तत्वं
सदेव: स्थान्महेश्वर: यजुर्वेद: योयज्ञैरखिलैरीड्यो योगेन च समर्च्यते नमाकुरोश्व
रदेव: सुराध्यक्षो पिनाकधृक् सामवेद: येनेदं भ्राम्यते चक्रं नदाकाशान्तरं महत् यो
गिभिर्वेद्यते तत्त्वं महादेव: सशंकर: अथर्ववेद: यंप्रपश्यन्ति देवेशं यतन्तो यतय:
परं महेशं पुरुषं रुद्रं स देवो भगवान्भव: एवं स भगवान्ब्रह्मा वेदानामीरितं शुभं
श्रुत्वा विहस्य विश्वात्मा यत्तत्रापि विमोहित: कथं तत्परमं ब्रह्म सर्वसंगविवर्जितं
रमते भार्यया सार्द्धं प्रमथै[illegible]श्चातिगर्वितै: इतीरिते थ भगवान्प्रणवात्मा सनातन: अमू
र्त्तोमूर्त्तिमान्भूत्वा वच: प्राह पितामहं प्रणव: न ह्येष भगवान्पत्न्या स्वात्मनो व्यति
रिक्तया कदाचिद्रमते रुद्रस्तादृशोपि महेश्वर: अयं स भगवानीश: स्वयंज्योति: स
नातन: स्वानंदभूता कथिता देवी नागंतुकी शिवेति विष्णुराशे ।६। कृते बाधि
कृते बाधकृते बाजन्माधकृतेषां येषां न वसति हृदये कुमतिपथो विमोचको रुद्र:
नागरखंडे मा भूत्तत्रकुले जन्म यत्र शंभुर्न देवतामिति यमात्रारस्मरतो ऽत्रैनरि

दुर्गा
८

तेफलंकिंस्यादेतत्सत्यंब्रूहीतिन इतिकृष्णेनाप्रत्युपपन्नस्य अत्रवःकथयिष्यामिइति
हासंपुरातनं विष्णोःसनत्कुमारस्यसंवादंपापनाशनं इममेवपुराप्रश्नंपृष्टवान् 6
विष्णुमव्ययं सनत्कुमारोभगवान्परापरविभागवान् मुनेस्तस्यवचःश्रुत्वाविष्णुः
सर्वविदांवरः यदुवाचमहाभागास्तच्छृणुध्वमतंद्रिताः इतिसूतेनस्यवचनंचादि
ष्य एकएवद्विवेदाख्यान्विधाचवक्ष्याम्यतः वेदेषुचपुराणेषुसांगोपांगेषुगीय
ते इत्यादिविष्णुवचनं ब्रह्मांडपुराणे पुरापितामहंदेवंमेरुपृष्ठेमहर्षयः प्रोचुः
प्रणम्यदेवेशंकिमेकंतत्त्वमव्ययमितिप्रश्नेनोपक्रम्य समाययामहेशस्यमोहि
तोलोकसंभवः अविज्ञायपरंभावंस्वात्मानंप्राहचर्षिणामित्यादिनाब्रह्मणःस्व
पराभवोपदेशानंतमाकर्ण्यासहमानस्यनारायणस्यस्वपराभवप्रतिपादनंचा
वनार्ये एवंविवदतोर्मोहात्परस्परजयैषिणोः आजग्मुस्तत्रतोदेवोवेदाश्चत्वा
रएवहि अन्वीक्ष्यदेवंब्रह्माणंनारायणमथास्थितं प्रोचुःसंविग्नहृदयायाप्या

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकं परमात्मानमुद्दिश्य एतमेके वदंत्यग्निं मरुतोन्ये प्रजापतिं इन्द्रमेके परे प्राणमपरे ब्रह्म शा
श्वतमिति सर्ववैदिकव्यवहारफलं चेश्वरायैव सर्वाणि भूतानि पंचभव्योप्यमूर्तिभिः जन्म
वृद्धिक्षयैर्नित्यं संसारयति चक्रवत् इति मूर्तिपंचकेन सर्वमूर्तित्वात्प्रलिंगप्रदर्शनेन शिवः
परमात्मेति स्वमतं स्पष्टीचकार बौधायनश्च शिवपूजाविधौ विष्णोस्तदावरणे निवेशात्त
द्देवतांतरपूजाविधिषु शिवस्यावरणदेवतामुख्यसंनिवेशाच्च तस्य सर्वोत्कर्षं सूचयामा
स कात्यायनोपि रुद्राध्यायैवं तत्सर्वमिति तस्य सर्वात्मकत्वेन परभावं द्योतयामास आ
श्वलायनोपि यस्मात्परतरं नास्ति नापरं च परात्मनः न ज्यायोस्ति न चाणीयो नमस्तस्मै
स्वयंभुवे येनेदमखिलं पूर्णं यन्मया मूर्तयः स्मृताः नमः शिवाय महते नमः सूक्ष्मा
त्परात्मने इति शिव एव सर्वोत्कृष्ट इति स्वमतं द्योतयामास केचिदन्ये महर्षयः प
रात्परतरो ब्रह्मा ब्रह्मणः परतो हरिः तस्य रात्परतो रुद्रस्तत्पादिभ्युति हृदयाभक्ताः
पन्नविघ्नराद्धिपरश्चवस्त्रसंस्मरहरमाधिकं विष्णोरपि परः साक्षाद्रुद्रः संहारकारक
इति स्कंदगीतासु स्कंदोप्याह परमात्मा विभागत्वं ब्रह्मादीनां द्विजर्षभाः समानत्वे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिं०वें० पिस्वदृष्टवरिष्ठोनात्रसंशयइति एवंब्रह्मणोहृदयंविष्णुर्विष्णोरपिशिवःस्मृतइत्यादिषुका 8
१० ५ र्येस्मरणं गीतासारादिवचनेष्वपितस्योत्कर्षोविष्करणानि दृष्टव्यानि शास्त्रकारेषुपतं
जलिस्तावत् क्लेशकर्मविपाकाशयैरपरामृष्टःपुरुषविशेषईश्वरस्तस्यशास्त्रनिमित्ते
तत्रनिरतिशयंसर्वज्ञवीजं सर्वेषामपिगुरुःकालेनानवच्छेदात्तस्यवाचकःप्रणवस्त
ज्जपस्तदर्थभावनमितिपरविषयाणि नशिवस्याणवोवंधःकार्मोमायेयएवच प्रा
कृतोवाप्यथवावंधोबद्धरूकारात्मकस्तथा नरागोनचवाद्वेषःशंभोरमिततेजसः न
चाप्यभिनिवेशोस्यकुशलाकुशलान्यपि सप्तविशेषःकथितोभगवानंतकांतकः लो
केशानितिशायत्वेनस्थितिंप्राहुर्मनीषिणः प्रतिसर्गप्रसूतानांवक्तृणांशास्त्रविस्तर
उपदेष्टासएवादौकालावच्छेदवर्जितो कालावच्छेदमेताणांगुरूणामप्यसौगुरुः
सर्वेषामेवसर्वेशःकालावच्छेदवर्जितः प्रणवोवाचकस्तस्यशिवस्यपरमात्मनः शि
वरुद्रादिशब्दानांप्रणवोहितपरःस्मृतः शंभोःप्रणववाच्यस्यभावनात्तज्जपादपि दुर्गा
यासिद्धिःसापराप्राप्याभवत्येवनसंशयइत्यादिवायुसंहितोत्तरभागसप्तमाध्या १०
यपठितवचनेकार्थानिसूत्राणिनिवध्नन् शिवस्यैवपरमात्वंप्रतिपादयामास

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सिं॰चं॰ ११ व इति कतमे रुद्रा इति दशेमे पुरुषे प्राणा आत्मैकादशस्ते यदास्मान्मर्त्याच्छरीरादुत्का
मंत्यथ रोदयंति तद्यद्रोदयंति तस्माद्रुद्रा इति कतम आदित्या इति द्वादश वै मासाः संवत्स
रस्यैत आदित्या एते हीदं सर्वमाददाना यंति तद्यदिदं सर्वमाददाना यंति तस्मादादि
त्या इति कतम इंद्रः कतमः प्रजापतिरिति स्तनयित्नुरेवेंद्रो यज्ञः प्रजापतिरिति क
तमः स्तनयित्नुरेवेंद्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुरित्यशनिरिति कतमो
यज्ञ इति पशव इति कतमे षडित्यग्निश्च पृथिवी च वायुश्चांतरिक्षं चादित्यश्च द्यौश्च
ते षडेते हीदं सर्वं षडिति कतमे ते त्रयो देवा इतीम एव त्रयो लोका एषु ही
मे सर्वे देवा इति कतमौ तौ द्वौ देवावित्यन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति योऽयं प
वत इति तदाहुर्यदयमेक इव पवतेऽथ कथमध्यर्ध इति यदस्मिन्निदं सर्वमध्या
र्ध्नोत्तेनाध्यर्ध इति कतम एको देव इति प्राण इति स ब्रह्म त्यदित्याचक्षत इति ॥ अस्याः
श्रुतेरयमर्थः उपासनार्हाणां देवानां संख्याविस्तारे शाकल्येन पृष्टो याज्ञव दुर्गा ११
ल्क्यो विजिगीषुकथायां प्रवृत्तत्वात्परबुद्धिव्यामोहायेति विद्वान्प्रत्युत्तरं ब्रवीति पे
दे निविच्छेदो वैश्वदेवनामके शास्त्रविशेषेऽवस्थितानां संख्याभाविनां पदानो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत एव तदैकार्थ्यादेव सत्त्राणोंत तत्स्मृत्यन्तमवधार्य्य तत्त्वकौमुदीकारः सत्त्राणं शिववि
षयत्वं स्पष्टीचकार तथा देवतानां स्वरूपं च वाजसनेयिब्राह्मणे शाकल्ययाज्ञवल्क्य
संवादे विचार्य्य निर्णीतं तत्र शाकल्यः याज्ञवल्क्योक्ता देवता विस्तारसंक्षे
पः स्वरूपं च प्रष्टव्याः तत्र वेदश्रुतिः अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति
देवा याज्ञवल्क्येति स हैतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविद्युच्यन्ते
त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्योमिति होवाच कत्येव देवा याज्ञवल्क्येति
त्रयस्त्योमिति होवाच कत्येव देवा याज्ञवल्क्येति षडित्योमिति होवाच कत्येव दे
वा याज्ञवल्क्येति द्वावित्योमिति होवाच कत्येव देवा याज्ञवल्क्येत्यध्यर्द्ध इत्योमिति
होवाच कत्येव देवा याज्ञवल्क्येत्येक इत्योमिति होवाच कतमे ते त्रयश्च त्री च शता
त्रयश्च त्री सहस्रेति स होवाच महिमान एवैषामेते त्रयस्त्रिंशत्त्वादित्यष्टौ वसव ए
कादश रुद्रा द्वादशादित्यास्त एकत्रिंशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति
कतमे वसव इत्यग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च
नक्षत्राणि चैते वसव एतेषु हीदं सर्वं वसु हितमपीदं सर्वं वासयन्ते तस्माद्वस

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिं० वं०

देवानां वचनं न ते गिरिजाखिललोकपाला विरंचिवैकुंठमुखे दुर्गमं ज्योतिः परं यत्र रजस्तमश्च
सत्त्वं न यत्तु जनिरस्ति भेदो नास्ति शिवभद्रगे श्रुतिसमं प्रसूतानां च लक्षणं शास्त्रविस्तरं उप
देष्टा स्मरणात्स्वेकाले तत् प्रवर्तिनां ईशानः सर्वविद्यानां सरावादिर्ज्ञस्तु वेधाः तस्य त्रि
धामहाविष्णुः सर्वज्ञानमहोदधिरिति कूर्मपुराणे ब्रह्मविष्णुरुद्रान्रुद्रेणोक्तं शंभुः
परतत्त्वो देवस्त्रिमूर्तिः परमात्मतनुः माहेश्वरी त्रिनयनी योगिनां शांतिदा सदेति उत्तर
भागे सर्वासामेव शक्तीनां ब्रह्मविष्णुशिवात्मिकाः प्रधानाः संस्मृता देवाः शक्तयः प
रमात्मनः आभ्यः परस्तात् भगवान्परमात्मा सदाशिवः गीयते सर्वशक्त्यात्मा शूलपा
णिर्महेश्वरः एनमेके वदंत्यग्निं नारायणमथापरे इंद्रमेके परे प्राणान्ब्रह्माणमप
रे जगुः ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः एकस्यैवाथ रुद्रस्य भेदास्ते परिकी
र्तिता इति स्कांदे ब्रह्मविष्णुश्च रुद्रश्च परतत्त्वविभूतयः एषां त्रयाणामधिकः शिवः
परमकारणं पाद्मे श्रुतानि सर्वशास्त्राणि पुराणान्यखिलान्यपि धर्मशास्त्राणि दुर्गा
सर्वज्ञत्वतः सूत मतो मन्ये अस्माकं संशयः कश्चित्तमशेषं हृदि वर्तते येनात्मनोऽद्य वै
संजाता छेत्तुं तं च त्वमर्हसि को देवः परमोऽस्माकं पूज्यश्चाराध्यश्च नेपि सः आराधि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

12

नाशिवोत्कर्षः स्फुटीकृतः उत्तरकांडेपि कर्त्तव्यकर्तुविचारसमये वसिष्ठादीन्मुनीन्स्वचि
कीर्षिते स्थापिते नैतद्रामस्य तच्छ्रुत्वा नमस्कृत्वा वृषध्वजं अश्वमेधं द्विजाः सर्वे पूजयंति
स्म निर्मलाः इति शिवसंबंधित्वेनैव अश्वमेधस्य प्राधान्यं तेनापर्यासेन च अश्वमेधेन रामचंद्रः
शिवमाराधयति रामोपि पालयामास राज्यं परमधार्मिक इत्यारभ्य पठितेन विशेषा
ल्लक्षणान्सर्वान्स्थापयामास चेश्वरं यज्ञेन यज्ञहंतारमश्वमेधेन शंकरमिति कौर्मवचने
न अभिषिक्तस्ततो राज्ये रामो राजीवलोचनः पालयन्पृथिवीं सर्वां धर्मेण मुनिपुंगवाः
अयजद्देवदेवेशं रामः स्वमेधेन शंकरमित्यादित्यपुराणवचनेन शिवस्य रामाराध्यत्वमु
क्तं यत्तु बालकांडे शिवनारायणयोः समरसन्नाहे अधिकंमेनिरे विष्णुमिति देवा
नां नारायणबलाधिक्यप्रतिपत्तिकथनं तद्धरनाद्धिद्धुशिवेन नारायणाय स्वाधिक
शौर्यं दत्तमिति प्रतिपादनात् स्वभक्तवरदानमपि पालनार्थं शिवस्यन्यूनबलत्वाभि
प्रायेण अन्यथासिद्धं भागवते चतुर्थस्कंधे दक्षाध्वरे कुपितस्य शंभोर्यमानानु
देवान्खेति ब्रह्मणो वाक्यं नाहं न यज्ञोन च यूयमन्ये ये देहभाजो मुनयश्च तत्त्वं विदुः प्र
माणं बलवीर्ययोर्वा न स्यात्म तंत्रस्य क उपायविधित्सेदिति अष्टमस्कंधेपि शिवप्रति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA